भ्र क्षणत्वात्।नचाभावमविषयातिव्याप्तिः।तत्रापित्वनभावेनाभावत्वभ्रमः।किंत्वभावम्र
न्योभाववत्वभ्रमं इत्यभावसामान्यलक्षणस्यातिव्याप्त्यभावादारोप्यस्याभावत्वादि
ति।अत्रब्रूमः।।प्रतियोग्यारोपपूर्वकनिषेधावगमविषयतावच्छेदकत्वंसंसर्गा
भावत्वं।एवमग्रेपीत्येतद्द्वयंलक्षणं।स्वरूपंतुयद्विषयतावच्छेदकेसंसर्गाभावत्वा
दितत्स्वाभावाभावत्वमस्वाभावाभावत्वंचा।तेननोक्तसर्वदोषावकाशः।अस्तिचघ
टस्ययोभावस्तदभावोघटः।घटान्योन्याभावस्याभावोघटत्वमिति।नचघटस्ययोन्यो
न्याभावस्तदभावोनघटइतिस्वसंसर्गाभावोलक्षणार्थइतिपुनरन्योन्याश्रयइति।
स्वाभावाभावत्वमित्यत्रवस्तुतोयद्यपिसंसर्गाभावएवपर्यवसितस्तथापिसंसर्गा

भावत्वेन न प्रविष्टः अभावत्वेनैव संसर्गाभाव उपस्थित इति न काचिदनुपपत्तिः। अ
३३ न्योन्याभावस्य स्वप्रतियोगिकाभावमात्राभावत्वाभावादिति सर्वं सुस्थं। माभूत्तावदि
ति। तथा चान्यदप्यस्तीति सूच्यते तत्त्वारोपाभावे तत्तदभाववुद्धिवैजात्यानुपपत्तिः।
33 आरोप्यसंसर्गावच्छेदमंतरेणाभावभेदासंभवादित्यादि। नेदमिदेति। यदि नारो
पो हेतुस्तदा भूतले घटसंसर्गान्योन्याभावसत्वे कदाचिन्नेदमिहेति कदाचिन्नेदमि
दमिति प्रतीतिवैलक्षण्यानुपपत्तेरित्यर्थः अनुपलंभादीनां कारणानां तौल्येन कार्य
वैजात्याकस्मिकतापत्तेः। कारणवैचित्र्यस्य कल्पनीयत्वेन पारिशेष्यादारोपहेतु
तायामेव पर्य्यवसानादिति भावः। यथाश्रुते फलीभूतप्रत्ययस्य वैलक्षण्येनोपन्या
सेनोक्तारोपकारणतायां प्रतीतिविधयामानमित्यसंगत्तोपन्यासापत्तेरित्यवधे

यं।गुणेति।गुणादेः प्रतिबध्यत्वे तदा यदि प्रतिबंधकभावाभावौ तत्रत्वाभावस्तत्रेति।
अभाववविशेषस्येति।तत्संसर्गावच्छिन्नप्रतियोगिकस्य प्रतियोगिविरुद्धस्यवेत्यर्थः।
तथाच संयोगावच्छिन्नप्रतियोगिकमप्यत्यंताभावो व्याप्यवृत्तिसंयोगात्यंताभावश्च
हेतुरितिनोक्तदोष इति भावः।नन्वत्यंताभावस्य नित्यतया सदा कार्योत्पत्तिरित्यत आ
ह सचेति।नित्यत्वेपि तदधिकरणसंबंधस्वभावता तस्य कादाचित्कीत्यर्थः।नन्वत्यं
ताभावस्य प्रतियोगिसादेश्यपमवछेदकं विनानुपपन्नमित्यत्यंताभावावछेदकतया
तौसिध्येतामित्यत आह।अत्यंतेति।प्रागभावादिवत्यवछेदककाल एव तदवछेदको
क्तः किं ताभ्यामंतर्गडुभ्यामिति भावः।अपिअस्वरसे तद्वीजमुक्तान्यथासिद्धिरेवेति।
विगीतत्वेनेति।यद्यपिअनिषिद्धत्वे श्रुत्यनुमापकत्वता दृश्याविगीतत्वाभावोयद्य

स्मिन्तदाश्रुतिनिषिद्धत्वादधर्मजनकत्वमेवतदभावेऽविगीतत्वंकस्यानुमापकमे
३४ वेत्तिउभययथापीदमयुक्तंतथापिशिष्टाप्रवृत्तिविषयत्वंविगीतत्वमित्यभिप्रेत्यैतदुक्तं
34 ॥वस्तुतस्त्वलौकिकत्वान्नैतदनुमानेदृढंतुलौकिकमेवमाण्यादिवदित्यवधेयं।मंत्रा
द्यजन्यत्वादिति।यद्यपियोगवत्क्षेमस्यापिकृतिसाध्यत्वंवक्ष्यतीतिमंत्रादिजन्यत्व
मस्त्येवकार्योनुत्पादस्य।तथापिमंत्राद्यजन्यत्वादित्यस्यमंत्राद्यकारणकत्वादित्यर्थः।
भवतिह्यनुत्पादस्यमंत्रादिजन्यत्वेपिमंत्रादीनांतदकारणतानुत्पादस्यपूर्वंसमयास
त्वात्।प्रागभावंविनातदभावात्।प्रतिबंधजनकत्वस्यचप्रतिबंधकाघेत्वादित्यव
धेयं।मिश्रमतमुपन्यस्यतिनव्यास्त्विति।मेयोदरिति।अतद्गुणसंविज्ञानवहुव्री
हिणामेयीकाञ्चासंयोगादिरभिमतः।अन्यथातयैवमेयोन्यदातत्रतदान्यत्रवारा ३४

द्यानुत्पादनापत्तेः। इदं च समाधिसौकर्यादुक्तं। यदा तु प्रतिबंधकाभावत्वं हे
तुतावच्छेदकत्वेनोच्यते तदा सकलमविकलमेवा। अत्यंताभावस्याव्याप्यवृत्ति
त्वादिति। नन्वन्वयव्यतिरेकतौल्येन चेदुभयजनकत्वं दंडदृढत्वयोरुभयो
रपि जनकत्वापत्तिः। अथ तत्र चक्रादिसमवधानं दंडस्य साक्षात्संबंधादि
ति दंडमात्रजनकतायां विनिगमकमस्तीति वैषम्यमुच्यते तदेतदुक्तिप्रतिबंधका
भावयोरपि तुल्यं। न च प्रतिबंधकाभावस्य वह्न्यादाविव करादावपि सत्वात्साक्षात्समवधा
नमस्येवेति वाच्यं। अधिकरणविशेषनियतप्रतिबंधकविशेषस्य कारणत्वेऽभावस
त्वेपि प्रतिबंधेनाधिकरणविशेषविशेषितप्रतिबंधकाभावकारणत्वस्यावश्यवाच्य
तयात्। दृष्टास्यान्य समवधानं परंपरासंबंधेनैवेत्यवश्याभ्युपगमात् तथा च दृढत्व

वदिदमवछेदकमित्यत्रचेराह किंचेति। यस्मिन्सतीति। कार्यजनक इति शेषः। नेनापफलो
पधानवत्वां यस्यां व्यक्तौ सत्यामपि यदभावात्कार्याभावस्तत्कारणं न तु तदवछेदकमि
३५ त्यर्थः। अतो दाहोपहितवह्नेरेव प्रतिबंधकसत्वासत्वयोः संभवेनावछेदकत्वं दंडे तु दृ
ढत्वसत्वासत्वे नैकत्र घटोपहितदंडे दृढत्वाभावरावनेति दृढत्वे नैवान्वयाद्यनुमि
३६ धानमिति तन्नदवछेदकमेवेति भावः। उक्तण एव नियमे विपक्षबाधकमाह। नहीति। तथा
सति कार्यार्थिनः कारणे अप्रवृत्यापातादिति भावः। किंत्विति। इतरसत्वे कार्याभावाभा
वो नियमतस्तदवछेदकत्वमित्यर्थः। यथाश्रुते दृढदंडत्वस्यानवछेदकत्वापातः व्या
प्तिरूपनियमग्रहे दृढत्वस्याव्यर्थत्वादिति भावः। अन्यथेति। कार्यायोग इत्यादेः कारण
त्व इत्यर्थः। इष्टापत्तावप्रवृत्यापत्तिरुक्तैवेति स्मर्तव्यं। नन्वेवं दंडत्वमपि सहकार्यवा

स्तुतावच्छेदकमित्यत्र आह यस्य चेति। यदि दंडत्वाग्रहेपि तु तादृग्रहस्तदा तथात्वेनांक्येत्ता
पि न चैवं। किंतु तदादायेत्यवच्छेदेन तदवच्छेदकमित्यर्थः। न चैवं दृढत्वेनावच्छेदकं स्यादि
ति वाच्यं। चक्रभ्रमिद्वारा तदनुविधानं दंडस्येति तादृग्दंडस्यैव नियतपूर्ववर्त्तिता
ग्रह इति न तदवच्छेदकत्वमत एव न वैपरीत्यं। विवक्षितविवेके न चक्रभ्रमिजनकत्व
स्यैव दाघ्यं तयाद्यजनकत्वात्। जनकत्वस्याजनकत्वात्। न चैवमन्यप्रतीतिन्याये
न दंडान्यथासिद्धिः। अन्यमुदासीनत्वस्य वक्ष्यमाणत्वादिति दिक्। स्थिरोवयवी
ति। मण्यादिसमवधानमात्राधीनाजनकत्वाव्यवहितकाले मण्याद्यसमवहितो व
ह्निरित्यर्थः। तादृशविशेषणस्थैर्यस्य प्रत्यक्षगम्यत्वाद्धर्मिवत् स्थिरोवयवीत्युक्तं। अव
यवीयोग्य इति यावत्। अन्यथा वह्नित्वस्य परमाणाववृत्त्यावयवीति व्यर्थं स्यादित्य

र्थः। ननु यावदजनकदशाव्यावृत्तत्वेन मण्याद्यभावादीनां यत्किंचिद्व्यावृत्तत्वं संयो
३६ गस्यापीत्यस्वरसादाह यद्वेति। नचैवं भावपदं व्यर्थं अभावस्यानुपलब्धिगम्यत्वेन मह
36 न्ये तस्यातीन्द्रियतयातदुपादानात्। गुरुमते तु दुरदृष्टाद्यतीन्द्रियाभावस्य वारणायो
पादानादिति भावः। कार्येति। कार्यानुकूलत्वं तादृप्यसिद्धये अत एव कार्यपदं स्वका
र्यपरं। अत एव हेतौ जनकपरमपि स्वजनकपरं। अन्यथा व्यभिचारादिति। अत ए
व वायौ र्थान्तरशंकादाह कार्येतरभावात्। अदृष्टपदमदृष्टवदात्मसंयोगेनातीन्द्रि
यपदस्तु — स्पर्शेनार्थान्तरवारणाय समवायपदमप्युक्तक्रमेण मण्याद्यभाववारणा
येति भावः। ननु हेत्वादिरन्यतरासिद्धोपि प्रसाध्यांगकत्वात् न तु तत्साध्यमपि तथा
तत्साधनार्थमेवोक्तप्रयासेनान्यस्यापि तत्साध्यकस्याप्रसिद्धसाध्यकतयाप्रकृतेतु ३६

ल्पत्वादिस्तुभयसिद्धमतींद्रियत्वं निर्वक्तुमन्यतरासिध्या केषांचिन्मतं दूषयन्ति। परं स्व
चेति। व्युत्क्रमेण संगमनीयं तेनाऽस्य हृद्यं न स्वमिति शेषं न परं प्रतीत्यर्थः। तथापीति। य
द्यपि संयोगादिजन्यज्ञानपंचकाविषयत्वमनुगतमस्त्येव तथाप्यभावकूटापेक्षये का
भावस्य लघुत्वात्तद्धर्ममेव साध्यमुक्तं। उभयेति। यद्यप्येवमुभयमतसिद्धावन्यत
रासिध्या व्यर्थविशेषणता तथापि साध्ये व्यर्थविशेषणतार्थान्तरं हेतौ त्वधिकमिति प्रा
चीनमतेन प्रयोगः। वस्तुतस्तु साध्ये व्यर्थविशेषणता न दोषः हेतुसमानाधिकरणात्यं
ताभावप्रतियोगितावच्छेदकत्वाभावस्य गुरुरूपावच्छेदके सुग्रहत्वात्। अधिकरणगो
रवस्यादोषत्वाच्च लघाविव गुरूपप्यधिकरणे सामग्र्यां सत्यामभावग्रहात्। अन्य
था तथाभूतावच्छेदकत्वाभावाग्रहे विशेषणे तथाभूतावच्छेदकत्वग्रहे व्यभिचारित्वा

पत्तेः। हेतौ नीलधूमत्वादिनाधिकरणप्रविष्टं किंत्ववच्छेदककोटाविति भवतित्यर्थः वि
३७ शेषता। न च वीजसाम्यादुभयमपि दोष इत्यनेन न विरोधः। अन्योन्याभावगर्भव्याप्तेरे
37 वगमकत्वमिति मतावष्टंभेन तदभिधानात्। तत्र साध्यवतोन्योन्याभावप्रतियोगि
तया साध्यस्यावच्छेदककोटिप्रवेशात्। उभयगर्भैव व्याप्तिर्नुमितिहेतुरित्युक्तमे
वेत्यन्यत्र प्रसन्नयानुमानादौ व्यक्तं सर्वमिति। नन्वन्यतरत्वं प्रत्येकनिष्ठमित्यत आह।
न्यतरत्वमिति। तदन्यान्यत्वे च संयोगत्वावच्छिन्नजनकत्वानाश्रयान्यत्वं। यथाश्रु
ते संयुक्तसमवायादौ संयोगसमवायगर्भतया संयोगसमवायान्यान्यत्वेवाच्यपं
चग्रहणं विरुध्येत किं च पूर्ववदुभयमतसाधारण्यानुपपत्तिः। आत्ममनोयोगस्य
योगिप्रत्यक्षादावपि जनकत्वात्। संयोगादावपि विषयविशेषसंयोगत्वादिवक्ते

वं। अन्यथात्ममनःसंयोगस्यापिसंयोगत्वेनजनकत्तयोक्तविरोधापत्तिः। नचविष
यपर्यंतविशेषणेसंयोगत्वपर्यंतविवक्षानयुक्तेतिवाच्यं। मनोगोचरयोगिप्रत्य
क्षस्यविषयसंयोगजन्यतयामनसोतींद्रियत्वानुपपत्तिरितिभावः। तस्येति। उक्त
साक्षात्काराविषयत्वस्येत्यर्थः। तस्याधिकरणरूपस्यसंयोगप्रत्यासत्त्यैवग्रहादि
तिभावः। यद्वातस्येत्यनंतरमतिरिक्तस्येतिशेषः तथाचपूर्ववदेवसंयोगादिग्राह्य
त्वादितिभावः केचित्तुअभाववतींद्रियत्वमित्यनंतरंदोषइतिपदमध्याहरंत्ति। तेना
भावातींद्रियत्वेपिनकाचित्क्षतिरितिभावः। तस्यासिद्धेरतींद्रियत्वलक्षणासिद्धेर
पितुप्रकृतेतींद्रियपदेनेदंविवक्षितंतेनाभावातींद्रियत्वादेवसमवायपदंसाध्यमुपा
त्तं। अन्यथास्वमतेनमट्टनयेऽभावातींद्रियत्वेपिन्यायनयेतस्यातथात्वेननतद्वारक

समवायपदं गर्भसाध्यमन्यतरासिद्धस्यादितिवदंति। ननु यदि कार्य्यसामान्यगर्भसा
३८ ध्यं तदा स्थितस्थापकेनार्थांतरं शंकादाह लक्षणविशेषकार्य्यगर्भत्वे तु नहि कापि नेति
तथैवानुमानमाह यद्वेति। अदृष्टत्वस्य धर्म्मत्वादेरित्यर्थः। न चाद्विष्टपदं नैव तद्वारि
38 तमिति वाच्यं। अद्विष्टपदस्याव्यासज्यवृत्तिपरत्वात्। न चादृष्टत्वाभावेन कार्याभावाभा
वात्तत्तदनुकूलमिति वाच्यं। अदृष्टस्य तत्स्थापनतया स्वस्वव्याप्येतरसमवधाने कार्या
भावव्यापकाभावप्रतियोगित्वलक्षणकार्याभावप्रयोजकाभावप्रतियोगित्वरूपानु
कूलत्वसत्वादित्यर्थः। कार्यानुकूलेति। स्वकार्यानुकूलेत्यर्थः। न चात्मत्वमिति। दाह ज
नकत्वरूपपक्षधर्मावच्छिन्नसाध्यव्यापकमिति शेषः। शुद्धसाध्यव्यापकमाह द्रव्यत्वं
चेति। घ्राणकेति। न च तन्निष्ठस्यैकत्वत्वादेरनुकूलस्यातींद्रियत्वाभावात्तत्र साध्यमे ३८

वनास्तीतिकथमेतदितिवाच्यं।धर्मांशस्याविवक्षितत्वेनतत्समवायित्वस्यचत
न्निरूप्यसमवायाश्रयत्वार्थकतयास्वसमवायिद्व्यणुकमादायैवतत्रसाध्यसत्वा
दितिभावः।नन्वनुकूलत्वंयद्यवच्छेदकत्वंतदादृष्टान्तासिद्धिः।अथजनकत्वंतदात्रा
त्मोसाध्याभावाभ्युपगमेऽपसिद्धान्तइत्युभयसाधारणंतदाहाऽनुकूलत्वंचेति।यद्याचे
तत्तथोक्तं।नन्वनुकूलतत्त्वेनप्रयोजकः।प्रतिकूलतत्त्वाभावस्तुप्रयोजकएवतथाचानं
तताद्दष्टास्वीकारएवप्रतिकूलइतिप्रवाहोमास्तुशक्तिस्तुसिद्ध्यत्येवेत्यरुचेर्दर्शितान्त
रमाहापिचेति।यद्यपिनिमित्तकारणेपिशक्तिरस्त्येवेत्यनवस्थानतथाप्येकाधिकरण
कानेकशक्तिरूपानिष्टप्रसंजनायसमवायिकारणपर्यन्तगवेषणं।यद्यपिप्रा
माणिकतयेयमनवस्थाऽदृष्टेशक्यतएवतथापिअवच्छेदकीभूतत्तशक्त्यापुत्पन्नायो

कार्य्ये शक्तिरुत्पद्यत इति प्राक् शक्तिसत्वे सत्युत्तरोत्तरस्य शक्तिसिद्धिरिति मूलभूत प्रथ
३९ मानुत्पन्नैनैकापि स्यात्। न च सहजापीति मंतव्यं। एतच्च कार्य्ये शक्तिपक्षे यदि च नित्यैव
शक्तिस्तदा प्रतिबद्धवह्नेरपि दाहापत्तिः। न चोद्भूता सा तदा नेति वाच्यं। उद्भूतत्वमपि
39 यदि नित्यं तदा स एव दोषः अनित्यं यदि तदा तद्देव शक्तिस्थाने निक्षिप्यतां किं मंतदाने
निवाच्यं। उद्भूतत्वमपि यदि नित्यं तदा स एव दोषः। अनित्यं यदि तदा तदेव शक्तिस्थाने
निक्षिप्यतां। किं मंतगडुनानित्यशक्तिकल्पनेनेति ध्येयं। ननु भावकार्यमात्रस्य सम
वायिकारणजन्यत्वे परोनमन्यते तन्मते समवायस्य भावकार्यत्वेप्य तथाभावादि
त्युक्तयुक्तेः प्रसाध्यांगकत्वेनानुपपन्नाह। किंचेति। शक्तिस्तदा यदि सा नित्या अनित्यत्वे गौ
रवत्वे परीत्यं नित्यतासंभवत्येवन प्रागुक्तयुक्तेरित्यस्वरसादाह तत्वेनेति। तथा च प्रति ३९

व्यक्तिस्वीकारेपि न दोषः प्रामाणिकत्वाऽगौरवस्येति भावः। ननु कार्यवैजात्यमेकत्र
कारणभेदेन कल्प्यमित्यत आह प्रदीपेति। तत्रानुपलब्धिबाधयैव नास्तीति भावः। ननु
कारणव्यंग्यैव सा जातिः कार्ये इत्यरुचेर्दीपान्तरमाहापि चेति। तथैव तछत्त्योरपीति।
नन्वेककार्य्यकारणतावच्छेदकावच्छिन्नानां परस्परसंवलनं कार्यजनने तंत्रं तथा च
वह्नित्वावच्छिन्नं प्रति या जनकतावच्छेदिका शक्तिस्तदवच्छिन्नसंवलनं तृणफूत्कार
वत्तृणारण्योरपीति नैवं सहकारिनियमः स हि फलविरोधेन परं निर्वहति स च कार्य
तावच्छेदकभेद इति सहकारिनियमादेव कार्यवैजात्यं न त्वेकशक्तिमत्वं जनकस्येति
। मैवं तृणादीनां वह्नित्वावच्छिन्नं प्रति एकशक्तिमत्वेन फूत्कारादीनां च तृणजन्यव
ह्नित्वाद्यवच्छिन्नं प्रति जनकत्वेनैव शक्तिसिद्धिसहकारिनियमयोरुपपत्तेरिति भावः।

स्वैकदेशिमतंनिरस्यति।यत्विति।प्रतिव्यक्तीति।नन्वनित्यतापक्षेगौरवमितिनित्यैवसा
४० स्तु।नचप्रतिबद्धेपितत्क्षणेदाहापत्त्याऽनित्यत्वमितिवाच्यं।तत्तणकारणतामुपजीव्यप्रतिवं
40 धककल्पनेतिप्रथमलक्षमनित्यशक्तौसत्यामपिप्रतिवंधेफलादर्शनेननतऊतोक्तेत्वा
दिकल्पनातु।नह्युत्तरकालीनोपजीवकधर्मोत्तरकल्पनेतिवैवान्यथाऽसिद्धिरुपजीव्यो
प्रथमलक्षणेशक्तिमपवदति।मैवं।शक्तिर्ह्युपजीव्याप्रतिवंधकल्पनेननतुतन्नित्यत्वम
पितत्कल्पनंविनापितत्प्रतिवंधादिकल्पनादितिभावः।जातीति।नन्वकारणतावैकाजा
तिःकल्प्यतामितिवाच्यं।शिलात्वादिनासंकरादितिभावः।तृणेति।उक्तयुक्त्याप्रमाणा
न्तरवलादेवातिरिक्तजातिसिद्धौनदवच्छेदकत्वकल्पनात्।नच्छ्यावृत्तौचमणिजन्यव्या
वृत्तेःफूत्कारजन्यत्वलक्षणानुगतवुद्धिरित्यर्थः।वाधकमिति।फूत्कारस्यवह्नित्वाव ४०

च्छिन्नं प्रतिजनकत्वे प्रागुक्तयुक्त्या मणिसमवधाने कार्यापत्तिः। तत एव जन्यवह्नित्वेन ज
नकत्वे गौरवमिति फूत्कारजन्यताग्राहकमेव लाघवसहकृतमवान्तरजातिं कल्पय
ति सैव फूत्कारजनतावच्छेदिका तत एव जन्यतावच्छेदकत्वेन लक्षणानुगतधीकारणं न तत्त्वको
पाधिः। लाघवेन जातिरेवावच्छेदकतयोपाधेस्तत्प्रतीतावतंत्रत्वादिति भावः। एतेनेति
निरस्तं कार्यतावच्छेदकाननुगमस्यादोषत्वात्तत्तद्वह्नित्वमेवावच्छेदकमस्तु किमनुग
तेनोपाधिना जात्या वेति। लाघवबलादेव बाधकाभावेनावान्तरजातेः सत्त्वात्। अत
एव द्रव्यध्वंसादौ कार्येननुगतसमवाय्यादिनाऽजन्यतत्तद्व्यक्तित्वमेवावच्छेदकमि
ति सिद्धान्तस्तत्रावान्तरजातिबाधात्। तदपसंक्षिप्तविभागो यत्र जातिः प्रमिता यत्र च
लाघवेन कल्पनायां बाधकाभावस्तत्रोभयत्रावान्तरजातिरवच्छेदिकान्यत्रानुगतोप

र्म्भ इत्यवधेयं। गोमयजन्येति। कार्यवैजात्यं यद्यपि द्वितीयानुमानसाधारणमिदं दूषणं।
५१ तत्राप्यजनकत्वगर्भसाध्यसत्वात्तथाप्यजनकत्वगर्भतदगर्भाभ्यां विभज्य प्रथमानुमान
51 पदं प्रथमकोट्यनुमानपरत्वेनोभयपरं द्रष्टव्यं। यद्वा बाधान्तत्र स एव स्फुटो दोषः किमने
नेति तदपहारेणेदं प्रथमपदं। यद्यपि चोद्भूतत्वविशिष्टा शक्तिरजनकदशाव्यावृत्तैवे
ति पूर्वपक्षैकंरकोद्धारः स्फुट एवास्ति तथापि नित्यानित्यविकल्पेन पूर्वोक्तेनैवोद्भूतत्वे
मानाभाव इति पूर्वोक्तावष्टंभेदनेदमुक्तमिति भावः। अतीन्द्रियत्वगर्भसाध्ये बाधोद्धारं
प्रागुक्तं दूषयति नोहेति। ननु जातिविशेषोपि न स्फुट इति कार्यविशेषव्यंग्यतया कार्य्य
विशेषान्नीतत्वाच्छक्तिवत्कल्प्य एव स इति विनिगमकाभाव इत्यतुष्यंस्तं दोषमुपेक्ष्य
तदनुमानमग्रिमत्रयं चेति प्रथमांग्रिमचतुष्कदोषान्तरमाहाग्रिमेति। तत्र प्रथमद्वये ५१

चरमे च कार्यपदं साध्यस्थं यदि च वह्निकार्य्यपरं तदा स्थितस्य व्यापकवत्ति पार्थिवे साध्यासत्वेन साध्यव्यापकत्वमुपाधेरस्तीत्यभिसंधानेनापार्थिवत्वपक्षधर्म्मावच्छिन्नसाध्यव्यापकत्वाभिसंधानेन वा चतुर्थ्थित्युक्तं। अन्यथा शाखादो यथाश्रुतसाध्याव्यापकत्वस्य तत्र तत्रि षत्वापत्तेरित्यवधेयं। नन्वप्रयोजकत्वेनैव तुल्ययोगक्षेमत्वं अन्यथा तर्कसत्वे उपाधिसंदेहस्यानवकाशादित्यप्रयोजकत्वस्य प्राक् उक्तत्वात् पुनरुद्भावनेनार्थाक्षिप्तपुनरुक्तमेतदित्यपरितुष्यन्नेवाह नान्तरमा हापि चेति। अप्रत्यक्षो यो इति। न चाप्रत्यक्षतया प्रत्यक्षतोऽन्वयादिर्म्मोग्रहसत्तो मानान्तरेणग्रहसत्तामिति वाच्यं। मानान्तरं हि न शब्दः सिद्धार्थत्वात्। नाप्यनुमानं। उक्तसाध्याभावग्राहकानुमानस्य जनकत्वाभावेनैव पर्यवसानात्। न हि जनकत्वाभावमंतरेण कार्य्यानुकूलातींद्रियाभावानुमानं जनकत्वस

त्वेन तस्यावश्यकत्वात्। न चैतदनुमानं साध्यसाधनाभावव्याप्तिग्रहमन्तरेण न च स ग्रहः
४२ तदन्वयव्यतिरेकप्रसिद्धिं विना तदुभयाभावस्य साध्यसाधनेन वेति साध्यसाधनव्याप्ति
४२ ग्रहे तदभावव्याप्तिधीस्तस्यां च सत्यां तदुभयव्याप्तिधीरित्यन्योन्याश्रय इति भावः। एते
न जनकत्वाभावः आकाशपरिमाणादौ प्रसिद्ध इति यत्केनाप्युक्तं तदपि प्रत्युक्तं। न हि
तद्ग्रहः प्रत्यक्षे क्वापि तस्य स्वप्रत्यक्षजनकत्वनियमादित्यतीन्द्रिय एव वाच्यस्तत्रैव
मेवान्योन्याश्रयादिति भावः। एतेन पंडेति। न च परार्द्धसंख्यापंडापूर्वयोः स्वध्वंसजन
कत्वादेव नाजनकत्वमिति वाच्यं। तन्मते ध्वंसस्याधिकरणादिरूपतया तेषां तदज
न्यत्वादिति भावः। ननु माभूत्केवलान्वयितयोक्तानुमानं शक्तिसाधकं किन्तु तृणादिस्थ
लेऽवच्छेदकत्वेन शक्तिसिद्ध्यनन्तरं वह्निनिष्ठदाहादिकारणतावच्छेदकधर्मः। श ४२

क्तिः कारणतावच्छेदकत्वात् तृणनिष्ठतादृशधर्म्मवदित्यनुमानात्तादृशशक्तिंसा
धयति स्यादेतदिति। ननु तृणादिनिष्ठैकशाविजातीयकारणकल्पकं ननु कारण
वैजात्येन कार्य्यवैजात्यकल्पनमिति भावः। वह्निमात्रस्याकस्मिकत्वं प्रागुक्तमुद्धर
ति। वह्निमात्र इति। ननु तृणजन्यत्वं तृणरूपादौ प्रसिद्धं तदभावश्च मणिजन्यव
ह्नौ सुग्रह इति तदवच्छेदेन मणित्वेन मणिजन्यत्वं ग्राह्यमिति हेत्वंतरमाह वह्नीति
। व्यभिचारेण तृणजन्यत्वं ग्राह्यमिति वह्नित्वावच्छिन्नं प्रत्येव न तद्ग्रहस्तदवच्छिन्नं प्र
त्येव मणिजन्यत्वग्रहो वाच्यः स च न संभवति व्यभिचारादिति भावः। ननु तृणस्यावि
शेषं प्रति न व्यभिचार इति विशेषमाशंक्य निषेधति। न चेति। उक्तेति। अन्वयव्यति
रेकौ द्वौ नियतान्वयश्चैक इति त्रिषु बहुवचननिर्देशः। अकार्य्यो कारणेति। कार्यका

रणभावइत्यर्थः। नचोक्तव्यभिचारज्ञानेजातेकथमव्यभिचारकरूपनियमगर्भहेतु
४३ ताग्रहइतिवाच्यं। समानप्रकारकविरोधिज्ञानस्यैवप्रतिबंधकतयातृणत्वावछि
43 न्नस्यवह्नित्वावछिन्नेहेतुतामाग्राहिवह्नित्वाश्रयतृणत्वाश्रययोर्व्यभिचाराग्रहाऽ
तृणंवह्निजनकमितितदाश्रययोर्हेतुहेतुमद्भावग्रहस्तुस्यादेवागंगास्नानंविना
श्वमेधात्स्वर्गइतिजानतःस्वर्गजनकंगंगास्नानमितिश्रोतज्ञानवत्। अतएवाह
नतृणत्वेनहेतुत्वंनवह्नित्वेनकार्यत्वंवेत्यऽन्यथाकार्यकारणभावाग्रहेनहेतुत्वं
कार्यत्वंचेतिसामान्यतएवप्रतिषेधेत्। नचोक्तज्ञानस्यहेतुहेतुमद्भावविषयकत्व
मनुभवविरुद्धमितिवाच्यं। तृणनिष्ठकारणतानिरूपितकार्यताश्रयत्वादेरेवकार्य
कारणभावत्वात्। नचकार्यतावछेदकज्ञानंकार्यतावद्विषयमेवनेतिवाच्यं। कार्य ४३

तावच्छेदकस्य तदाश्रयमात्रवृत्तितार्थकत्वे कार्य्यतावच्छेदकत्वविषयकज्ञानस्य
कार्यताश्रयविषयत्वनियमात्। न चैवं तृणनिष्ठकारणताप्रतियोगिककार्यताश्र
यत्वं गृह्यत इति क्रियतां किं तावत्पर्यन्तानुसरणेनेति वाच्यं। अग्रिमविनिगमका
वेषणस्य सामान्यतोवच्छेदकग्रहं विनानुपपत्तेः। सामान्यतो दृष्टावतारे सत्येव प
रिशेषावतारादिति भावः। किं तृणादीति। अभावत्रयप्रतियोगिकव्यासज्यवृत्तिप्र
तियोगिताक इत्यर्थः। नारणीति। सकलसाधारणानुगतधर्म्माभावात्प्रत्येकं पर्य्यव
सानेस एव दोष इत्यर्थः। तेनेति। पूर्वमन्वयव्यतिरेकावच्छेदकधर्म्मेण जनकत्व
२२ मित्युक्तं इदानीं तेन रूपेणान्यथासिद्ध्यनुविधानं कारणतातृणत्वादिनेति भेदः। वस्तुत
स्त्वेवमनुगतधर्म्मेण जनकत्वे फूत्कारेण तृणदेवत्यादिसहकारिनियमानुपपत्तिः

स्वजन्यजातीयस्वरूपयोग्यतावच्छेदकसमवधानेनैवफलोत्पत्तेः।नचतत्तणजन्यव
४४ ह्नौफूत्कारत्वजनकइतिवाच्यं।जातौसंभवंत्यामुपाधेरनवच्छेदकत्वात्।तस्मात्फ
लविशेषमन्तरेणसहकारिनियमानुपपत्तेः।सएवतत्तणादीनामन्योन्यविजातीयज
नकत्वमाक्षिपतितत्त्वजनकवैजात्यादितिनेहानुगतंजनकतावच्छेदकंसंभवद
पिग्राह्यं।अतएवतत्तणाद्यन्यान्यत्वेनाप्यनुगतेनजनकत्वमपास्तमितिसंक्षेपः।उ
भयसिद्धतामेवव्यवस्थापयतिकथमिति।तदेवासिद्धमित्याशंकते।नन्विति।न
नुप्रोक्षितत्वादित्यत्रप्रोक्षणध्वंसवैशिष्ट्यप्रतीतेःकिंप्रोक्षणध्वंसजनकतायांतात्पर्यं
अथवापूर्ववर्त्तितायांप्रोक्षणस्येतिसंदेहेविनिगमकमनुमानमाहप्रोक्षणमिति।न
चध्वंसहेतुतावादिनस्तदर्थमुपादीयमानत्वमसिद्धमितिवाच्यं।उपादीयमानत्वे ४४

नविधीयमानत्वस्यविवक्षितत्वात्।उपादानस्यविधिवचनत्वात्।तथाचतत्कथं
ताप्रवृत्तविधिप्रतिपाद्यत्वादितिपर्यवसितं।अस्तिचव्रीहिभिर्यजेतेत्यनंतरंकथमे
तदित्याकांक्षायामवहंतीतिवत्तत्कथंतायांप्रोक्षणविधिप्रवृत्तिस्तथाचेदमेवविनि
गमकंवाक्यशेषस्यपूर्वभाववोधनइतिभावः।वस्तुतस्तुप्रोक्षतीतिविधिनाप्रोक्षण
हेतुताप्रतीतेर्वाक्यशेषादपितद्धेतुत्वप्रतीयतेनध्वंसस्येतिनहेतुत्वसिद्धिरितिभावः
प्रतियोगिनइति।यथाचैतत्तथापूर्वंवक्ष्यते।आद्येति।प्रायणव्यवहितकालवृत्ती
त्यर्थः।भोगेति।यद्यपिज्ञानजनकत्वस्यैवसामर्थ्याद्व्यर्थविशेषणतातथापिकश्चित्सु
खीकश्चिद्दुःखीत्यादिवैचित्र्योपपत्तिरदृष्टंविनानसंभवतीतितत्सूचनायविषयवि
शेषोपादानं।तन्निर्मितेत्युपलक्षणंतद्भोगसाधनेत्यपिद्रष्टव्यं।अन्यथासाधनवैक

स्यापत्तेः भावभूतमिति। अतिशयग्राहकमानमेवोक्तयुक्त्या वक्ष्यमेन भावभूते पर्यवस्य
४५ त्ति। यद्वा तथैव साध्यं कर्त्तव्यं यथा च साध्ये न व्यर्थविशेषणता। तथोक्तमधस्तादिति। फले
45 ति। फलोपपादकस्य फलसामानाधिकरण्यौचित्यादित्यर्थः। ननु लाघवं न विनिगमकं
उभयपक्षे सत्त्वात्। यथा फलसमानाधिकरणशक्तौ लाघवं तथैकत्वेनापूर्वद्वित्यस्व
रसादाह किं चेति। प्रोक्षणं व्रीहिसमवेतातिशयजनकं तन्निष्ठफलार्थितया क्रियमा
णत्वादित्यवश्यमेन शक्तिसाधकस्य बलवत्त्वादिति भावः। उक्तानुमाने सत्प्रतिपक्षं
शंकते अथेति। व्यभिचारादिति। तथा चासत्प्रतिपक्षितमुक्तानुमानमेव विनिगमक
मित्यर्थः। सामानाधिकरण्यलाघवानादरे विनिगमनार्थोपन्यस्तानुमानमेवाप्रयो
जकमिति लाघवमेव विनिगमकं वाच्यं तच्चैकत्वपक्षे सामानाधिकरण्यस्यापि तावव

न्निष्टनानात्वेनगुरुत्वादनुमानान्तरोपष्टंभाच्चेत्यभिसंधायापूर्वंसाधयति।अती
न्ति।प्रकारार्थमनुमानमाह।तथाहीति॥अपूर्वजनकं।अवघातानुकूलापूर्वज
नकमित्यर्थः।तेननियमापूर्वजनकतायास्तेनाभ्युपगमान्नसिद्धसाधनमिति
भावः।दृष्टेति।व्याप्तिश्चदृष्टद्वाराभावेयत्कालान्तरभाविकार्यानुकूलंतयाविहितंत
त्तदनुकूलापूर्वजनकमितिसामान्यमुखीद्रष्टव्या।अर्थेस्तुदृष्टद्वाराभावेसतीत्यस्या
दृष्टान्यद्वाराभावेसतीतिबोद्धव्यः।कृष्यादौव्यभिचारवारणाय।प्रायश्चित्तेव्यभिचा
रवारणायकालान्तरेति।नचैवंविहितत्वादित्यधिकंसाध्यनिष्ठापूर्वपदस्यधर्म्मप
रतयानिषिद्धकर्मणिव्यभिचारवारणायतदुपादानादिति।कृष्यादाविति।यद्यपिविहि
तत्वाभावेनैवतत्रनव्यभिचारस्तथापिप्रत्येकवर्णापायविभागविषयेणविधिनावे

४६ श्यस्यकृषिविधानाद्विहितपदस्यचबलवदनिष्टाजनकत्वाद्धाकृष्यादौविहितत्वग
५८ मेहेतुगमनेऽद्रष्टव्यं। नियमइति। तथाचतद्वषंभात्प्रोक्षणंव्रीहीनिघ्नातिःयजन
कंव्रीहिनिष्ठकालान्तरभाविफलार्थितयाक्रियमाणत्वादित्यनुमानादपूर्वसाधकम
नुमानंसत्प्रतिपक्षितमितिभावः। नातुवधमिति। एतच्चतन्मतेऽस्मन्मतेफलोपपा
दकमपूर्वंफलाश्रयएवकल्प्यतइत्यग्रेवक्ष्यमाणत्वात्यागयाश्रापूर्वस्यपितरी
वच्छेनापूर्वस्यशात्तुनिष्ठत्वमेव। अतएवपंचमटीकायाममुसेवार्थसिद्धवदाहाप
रमतेत्वपूर्वंवाच्यंअतोविधिप्रत्ययवाच्यकार्यस्यकर्त्रन्वितत्वेनैवप्रतीतेःकृतिस
मानाधिकरणमेवापूर्वंनहिस्वर्गकामोयजेतेत्यत्रयागविषयकंकार्यमित्यन्वये
कर्त्तर्याख्यातवाच्यसंख्यान्वयःभावनान्वयिन्येवतदन्वयादितिस्वर्गकामोयाग ४६

विषयककार्यत्वानित्यैव सर्वत्रान्वयइत्यन्यस्यापूर्वोश्रयत्वमग्रेपि दुःकल्पनमि
तिनन्मतेनेदमुक्तमस्मन्मतेदोषमाह विपक्षइति। नचफलसामानाधिकरण्यला
घवमेवविपक्षबाधकमितिवाच्यं। नानात्वगौरवेणतल्लाघवानादरस्योक्तत्वादि
तिभावः। यदुद्देशेनेति। याक्रियायद्विषयासातन्निष्ठफलानुकूलातित्रायजननी
त्यर्थः। वर्हिषइवेति। व्यतिरेकेदृष्टान्तः। तेनयथावर्हिस्तृणान्तिवर्हिषिइविरासा
दयन्तीतित्राइवलात्तत्रविनियुक्तेविनियोगस्तथात्रपुनरूपयोगोनस्यादितिभा
वः। यद्वावर्हिषइवेतिवर्हिर्यागस्येत्यर्थः। तज्जातीयेति। अनाकाङ्क्षायामविशेषा
दितिभावः। उक्तेति। व्याप्तिवचनान्यायेनेत्यर्थः। संयोगस्येति। ननुफलस्योपलक्ष
णत्वेतत्तद्व्यापारमात्रस्यैवधात्वर्थत्वेत्यजिगम्योःपर्यायतापत्तिः। अवच्छेदकीभू

न्तयोः फलयोर्व्विभागसंयोगयोर्धात्वर्थोप्रवेशास्पंदमात्रस्यैवाविशिष्टस्योभयधा
४७ त्वर्थत्वात् कर्म्ममात्रस्यैवोभयजनकत्वेनपत्तनादिवदवांतरजातिमेदमादायार्थभे
दस्य दुरूपपादत्वादिति। मेवं। व्यापारे उपलक्षणी भूतस्यापि फलस्य प्रतीतेर्व्विशे
47 षणत्वात्। इष्टसाधनत्वविधिपक्षे क्रियोपलक्षणस्यापीष्टस्य ज्ञाने विशेषणताव
त्तदत्र फलविशिष्टो व्यापारो यदि वाच्यस्तदा फलविशिष्टव्यापारधीः शाब्दात् अप
रथा फलोपलक्षित व्यापारधीरित्युभयथा फलांशेपि शक्तेः कप्रतीत्यविशेषो येन
पर्यायता। विशेषणत्वे प्रकृते कर्मत्वानुपपत्तेः। कृप्तलंश्रययेदित्यत्र फलविशिष्ट
धात्वर्थवाधाद्विध्यनुपपत्तेश्चानन्यगतिकतयोपलक्षणपक्ष आश्रीयते ननु तदन्या
तः कुतोपीति दिक्। ननु प्राप्यसंस्कार्ये कर्म्मणोरेवमविशेषे कर्म्मचातुर्व्विध्यं वि

रुध्येतेत्यरुचेः संस्काररूपफलभागितया कर्मत्वमित्याह। किंचेति। प्रयोगेति।
संस्काराभावे उपेक्षाज्ञानेपि तथाप्रयोगादिति भावः। प्रतिष्ठाकालीनेति। नचास्पृ
श्यस्पर्शकालीनप्रतिष्ठया पूज्यत्वापत्तिस्तत्र कर्म्मवैगुण्येन प्रतिष्ठाया एवासा
गत्वात्। नचानाद्यंतर्भावे गौरवं यावताऽस्पृश्यस्पर्शीयाबदभावसहितस्यैव पूज्य
त्वप्रयोजकत्वसंभवादिति वाच्यं। तावदभावसहितप्रतिष्ठाध्वंसहेतुत्वे तावत्ता
ऽभावा अपि हेतव इति ध्रुवं। तथाचानादित्वानंतर्भावे साधर्म्याभावानामपि जनकत्वमि
ति बहूनां जनकत्वे गौरवमित्यल्पजनकत्वलाघवाय सादिव्यावर्त्तनार्थमनादि
पदोपादानात्। यत्र ह्येकस्या एव व्यक्तेर्जनकत्वमुभाभ्यामवच्छेदकाभ्यां सविशे
षणनिर्विशेषण निर्विशेषणाभ्यां तत्रोपन्यस्तक्रमेण गौरवं यत्र विशेषणप्र

क्षेपेणापरासामनन्तानांव्यक्तीनांजनकत्वंतत्रलाघवाद्विशेषणपरिग्रहएव। अतएव
४८ संसर्गापदमणुपात्तमितिभावः। क्वचिदिति। यत्रैकदाप्यस्पर्शपस्पर्शोनजातएवस्पर्शः। नचै
वंप्रतियोग्यप्रसिद्धिस्तत्प्रतिमाप्रतियोगिकास्पर्शपस्पर्शाभावादितिवाच्यं। प्रतिमायाअभा
48 वविशेषणत्वात्तनुप्रतियोगिविशेषणत्वादितिभावः। परमाणुपाकजेति। नचविशेषोय
दिव्यक्तिकृतस्तदातिप्रसंगः सामग्र्यवैचित्र्येजातिकृतोसंभावितएवेतिवाच्यं। कत्नमध्वं
सादिरूपकारणभेदेनैवसामाग्रीवैजात्येनजातिकृतस्यैवविशेषस्यसंभवादितिभावः
उद्भवेति। अत्रयद्यनुद्भूताद्द्भूतमितिसिद्धान्तस्तदायमतद्गुणसंविज्ञानबहुव्रीहिरित्य
वधेयं। वस्तुतस्तयोरुद्भूताद्वेवोद्भूतमितिसम्यक्। कथमन्यथोद्भूतादनुद्भूतानुत्पत्तिनि
यमः कार्यसाजात्येकारणसाजात्यकल्पनाचस्यात्। अदृष्टनिमित्तत्वेद्वयस्याप्यनुपपत्ति ४८

रिति। ननुत्रयमप्यसंगतं आद्ययोस्तुलादिसामग्याः क्षणिकत्वेकालान्तरभाविजयादिज
नकत्वानुपपत्तिः। अंत्येऽज्ञापिकयाः सामग्या अपूर्वजनकत्वेमानाभावइत्यस्वरसादाह
यद्वेति संनिधिध्यानेनविधिनातुलारूढोयंनिःपापइत्यादिज्ञानजन्यं संस्कार एवेत्यव
धेयं। नचसंस्कारस्यस्थैर्येणान्यदापितुलारोहणेजयाद्यापत्तिः फलकल्पनयान्यदात
त्संस्कारनाशस्यापिकल्पनादिति। स्वस्वेति। अत्रयत्रकार्यस्यघटादेरभावस्तत्रदंड
भावइतिकार्यसंसर्गाभावेनदैशिकोव्यापकता। यदाघटाभावस्तदादंडाभावइति
कालिकोसामग्रीकालेव्यभिचारात्। एवंचदंडसत्वेपिचक्राद्यभावेनघटाभावेव्यभिचा
रात्कथंव्यापकतेति व्यभिचारवारणाय कार्याभावंविशिनष्टिस्वेनरसकलसंपन्नावि
त्तिनेनदंडेनरसकलसंपन्नौसत्यां यत्रघटाभावस्तत्रदंडाभावइतिनव्यभिचारस्ता

वतित्वे चाप्रसिद्धिः दंडेतरसकलमध्यपतितानां चक्रभ्रम्यादीनां संपन्नो घटाभा
४९ वाप्रसिद्धेरत उक्तं स्वव्याप्येति। तथा च चक्रभ्रम्यादीनां दंडव्याप्यतया तदितरकाली
नकार्याभावं प्रति व्यापकत्वमस्त्येव दंडाभावस्य स्वव्याप्यत्वं च स्वप्रागभावव्यापकप्रा
गभावप्रतियोगित्वं व्यापकत्वं तु कालिकमिति भावः। अत्र वदंति। स्वेतरपदं स्वेतरका
रणपरं वा स्वेतरप्रमेयमात्रपरं वा आद्ये आत्माश्रयः। अंत्येऽसंभवः। घटघुत्पन्नोवे
माद्यसमवधानात्। किंच यत्र स्वमप्यऽस्ति तत्रापि स्वेतरसमवधानमस्तीति कार्याभा
वाप्रसिद्धेः॥ न च स्वेतरसमवधानेन स्वासमवधानं विवक्षितं अजनकसाधारण्यात्।
नहि स्वाभावे यत्र कार्याभावस्तत्र न स्वाभाव इति संभवति तथा च घटं प्रति वेमादेरपि
हेतुतापातः। अपि च कुलालपितुरप्येवं घटजनकत्वापत्तिः किंच दिगादिहेतावव्या ४९

प्तिः कार्याभाववत्तिदेशोकाले चानंतरमभावात्। अपि च यत्र कार्याभावस्तत्र दंडाभाव
इति नास्ति दंडावयवे घटाभाववत्यपि दंडाभावाभावादिति सर्वमनुपपन्नं। अत्र ब्रूमः
। स्वस्वव्याप्येतरपदेन कार्यप्रागभावव्याप्यप्रागभावप्रतियोगिसकलसंपत्तिर्विव
क्षितेति नासंकुचितं सकलयदन्नवाकारणमात्रपरं। व्याप्तिश्च कालिकीत्युक्तं। यत्तु स्व
समवधानेपि स्वेतरसमवधानमित्यादि तत्तुच्छं। यत्र स्वेतरसमवधाने कार्याभावस्त
त्र स्वाभावइत्यत्र काचित्क्षतार्घटाभावप्रसिध्यैव व्यभिचाराभावात्। न हि स्वेतरसम
वधानं यत्र तत्र कार्याभावइति ब्रूमो येनोक्तस्थले कार्याभावाभावो दूष्येत। अत एवा
जनकातिव्याप्तिशंकापि न तत्रोक्तनियमाभावात्। पटेपि कुलालपितुरित्यादि तत्र पि
नाद्दं हि कारणसामान्यलक्षणं तथा च कुलालपितृत्वेनान्यथासिद्धत्वे कुलालत्वेन

तस्यापि जनकतयातिव्याप्त्यभावः। न च कुलालपितृत्वेन जनकत्वापत्तिः। यस्य कार्यभा
५० व्यापकाभावप्रतियोगित्वं तस्य कारणत्वमित्येव लक्षणार्थो न तु यद्रूपावच्छिन्नाभावप्रति
50 योगित्वपर्यन्तमित्यापादकाभावात्। येन केनापि रूपेणोक्तधर्मस्यैव जनकत्वरूप
त्वात्। न च दण्डरूपादावन्यथासिद्धत्वव्याप्तिस्तस्य स्वस्वव्याप्येतरदण्डादिसकलसंप
त्तौ कार्यभावस्याभावेनोक्तरूपाभावात्। अत एव दण्डत्वमपि निराकृतं तत्र व्याप्त्यप्रसि
द्धेश्च। न चैवं नित्यमात्राव्याप्तिः कार्यभावस्य त्वात्सत्त्वात्सिद्धेरेव तत्र हि कार्यभावव्या
पकाभावप्रतियोगित्वमपि दुर्लभं ज्ञानादावात्माद्यभावादसंभवादिति। तस्मादिदं वि
वक्षितं यद्रूपावच्छेदेन जनकत्वं तद्धर्मावच्छिन्नतदभावः कार्यभावव्यापक इति न व्य
भो येनात्मत्वावच्छिन्नाभावाभावाद्व्याप्तिरपि तु तद्धर्माश्रयाभाव इति तत्र च व्याप्य ५०

प्रसिद्धिरेवज्ञानं प्रत्याकाशस्यव्यापकाभावप्रतियोगित्वमेवनास्ति आकाशाभावासं
नवात्‌।नचकाशेप्येवमहेतुतापत्तिः अयेनिरस्यत्वात्‌।गंधंप्रतिरूपप्रागभावादीनां
नहेतुत्वंस्वस्यव्याप्येतरसकलसंपत्तौयत्रकार्याभावस्तत्रस्वप्रागभावाभावइतिउत्प
त्तिपुनरनुत्पादस्थलेदृष्टोनतुव्यापकप्रागभावाभावः।व्यापकप्रागभावादीनांतत्रा
पिसत्वात्‌।कार्याभावव्यापकाभावप्रतियोगित्वंतुतादृशाभावप्रतियोगितावछेदकाव
छिन्नत्वंतदस्तिस्वप्रागभावस्यनतुस्वव्यापकाभावस्येतिनातिव्याप्तिः।यद्वाअन्यथासिद्ध
त्वमिहापिलक्षणेदेयमतोनकुलालपित्रादौप्रसंगः।यत्तुनित्यस्यात्मादेरितितन्न।यद
वछिन्नाभावव्यापकाभावप्रतियोगितावछेदकावछिन्नत्वस्यहेतुत्वात्‌।अस्तिवात्मत्वा
वछिन्नाभावस्यज्ञानाभावाव्यापकत्वेपिगुणत्वावछिन्नाभावंप्रतिसमवायित्वावछि

न्नाभावस्य व्यापकत्वं अस्ति च दिक्कालयोस्तत्तावच्छिन्नाभावस्याव्यापकत्वेपि आधारा
५९ भावत्वेन न तदभावस्यापि कार्य्याभावव्यापकत्वात् अत एव ज्ञाने प्रत्याकाङ्क्षा महेतुः। केना
पि रूपेण न तदभावस्य कार्य्याभावाव्यापकत्वात्। यदभावस्य येन केनापि रूपेण यत्किं
59 चिद्रूपावच्छिन्न यत्कार्य्याभावव्यापकत्वं तस्यैव तद्धेतुत्वमिति प्रकृतलक्षणार्थत्वात् न
चैवमात्मत्वं हेतुतावच्छेदकमपि न ज्ञानेपि हेतुत्वस्य कार्य्याभावव्यापकाभावप्रतियो
गित्वरूपस्य तेनानवच्छेदात्। किं त्वाधारत्वेनावच्छेदात् सामान्यसामग्रीत एव कार्य्यं न तु
विशेषसामग्री काप्येवमिति वाच्यं। तत्तत्कार्य्यं प्रति स्वसमवायितयैवात्मत्वपर्य्यव
सानात्। न च समवायिकारणतावच्छेदकं कथं समवायित्वमिति वाच्यं। समवायि
कारणत्वस्याविशिष्टस्यानवच्छेद्यत्वात्। गोरवान्नीलघटत्ववत् अपि तु समवायि ५९

त्वावच्छेदेन कारणत्वमित्यत एव तत्समवायिकारणं भवति। वस्तुतस्तु यदेतदात्म
त्वं दृढदंडत्वादिकं कारणतावच्छेदकं न तत्कार्याभाववद्व्यापकाभावप्रतियोगित्वं कार
णत्वमिति मतेन किंतु सहकारिवैकल्यप्रयुक्तकार्याभाववत्त्वं हेतुत्वमिति मते तेषामे
व सहकारिवैकल्यप्रयुक्तकार्याभाववत्त्वावच्छेदकत्वात् नहि नियतपूर्ववर्तित्व
रूपकारणत्वपक्षेपि दृढदंडत्वं कारणतावच्छेदकं अपि तु दंडत्वमेव लाघवात्।
किं बहुना प्रमेयत्वादेरपि तदा हेतुतावच्छेदकत्वापत्तिः। तस्मात्सहकारिवैकल्येत्या
दिकारणतापक्ष एव तदवच्छेदकमिति समवायित्वाधारत्वावच्छिन्नाभावस्य कार्या
भावव्यापकत्वे सहकारिवैकल्येत्यादेरात्मत्वावच्छेद्यत्वेन कोपि विरोध इति सर्वं सुस्थं।
यत्तु घटाभाववति दंडावयवे दंडसत्त्वाद्व्यभिचार इति तन्न। कार्याभाववति यत्संसर्गा

वच्छिन्नयदभावस्तत्संसर्गावच्छिन्नत्वस्य हेतुत्वरूपत्वात् अस्ति च घटाऽभावव्यापको यो
५२ दंडसंसर्गाभावः सं दंडावयवेऽपि न चैवं तदा यत्र धूमो धूमावयवे तत्र वह्न्यभावाद्धूम
52 वह्निव्याप्तिरपि न स्यादित्यलमधिकेन। नन्विदं कारणत्वमतीन्द्रियघटितसकलसं
पत्तिगर्भतया दुर्ग्रहं प्रत्यक्षस्याप्रवृत्त्या साध्याप्रसिध्यादिना मानान्तरस्याप्यप्रवृत्तेरि
त्यस्वरसादुक्तलक्षणान्तरमाहाऽथवेति। यत्र कार्याभावव्याप्यताइतराभावसहकारावच्छि
न्नातदवच्छिन्नं कारणं तदवच्छिन्नत्वं कारणत्वमिति यावत्। तेन यत्र दंडाभावत्वं तत्र घ
टाभाव इति दंडाभावत्वनिष्ठघटाभावव्याप्तौ दंडाभावस्यैवावच्छेदकतयाऽजनके दंडा
भावत्वादावतिव्याप्तिः। वीजत्वे कार्याभावव्याप्ये जनकत्वाभावात् असंभवश्च न संभवति।
तत्र दंडाभावसहकृतत्वस्यानवच्छेदकत्वाभावात्। वीजत्वावच्छिन्नस्यैव जनकत्वात्। ५२

एवंचाग्रे वीजवीजत्वपदे वीजत्ववीजत्वत्वपरे इतराभावेनेतराभावसहकृतत्वे
नेत्यर्थः। शिलात्वेन। शिलात्वत्वेनेत्यर्थः। अत्रवदंति। कार्याभावस्तज्जन्यकार्याभावो
वा तदभावमात्रे वाधे आत्माश्रयः अत्येशिलायामप्यंकुरस्य संयोगस्सत्वासत्वेन
तत्रापीतराभावसहकृतशिलात्वस्य कार्याभावव्याप्यत्वादिति। अत्रब्रूमः। उत्पत्ति
कालीनसंबंधावछिन्नकार्याभावव्याप्यत्वं विवक्षितं अतएवाग्रिमलक्षणेनुत्पत्तिव्या
प्यत्वमित्येव वक्ष्यति। एवंच संयोगादिसंबंधस्योत्पत्त्यनंतरकालीनतयातदवछिन्ना
भावमादाय नशिलादौ प्रसंगः उत्पत्तिकालीनश्च संबंधो द्वयमेव कारणता समवा
यश्च। तदवछिन्नाभावो नांकुरस्य शिलायां कालिकः येनेतरसहकारेण वछिद्येत
किंतु तदवछिन्नकार्याभावः समवायिनि वीजादौ च। द्वयं च कारणमेव। नच कारणता

गर्भतयात्माश्रयः।कारणतायाअपिसंबंधत्वेनैवज्ञानात्।वस्तुतस्तुबीजादंकुरइति
५३ 53 प्रतीतिबलाद्अवध्यवधिमद्भावलक्षणःस्वरूपसंबंधविशेषएवविलक्षणःकार्यकार
रयोस्तत्संबंधावच्छिन्नेकार्याभावश्चकारणइतराभावावच्छेदेन।स्वरूपायोग्येनुतादृ
शस्वरूपसंबंधाभावादितराभावानवच्छिन्नएवनादृक्कार्याभावइतिनकोप्यतिप्रसं
गइतिसर्वमिवदातं।अतएवबीजादंकुरइत्यादौहेतुतायामपिपञ्चमीनिर्देशासंभवे
नतादृशप्रतीतेरवध्यवधिमद्भावविषयत्वापर्याप्तौबीजादंकुरोत्पत्तिरितिप्रतीतेरव
श्यमवध्यवधिमद्भावगोचरत्वनियमादिदंलक्षणमपहायाग्रिमलक्षणेकार्यानुत्पत्ती
त्यवकंठरवेणाभिहितं।नह्यंकुरइवोत्पत्तिरपिसहेतुकायेनतत्रापिहेतुपंचम्येवकु
त्स्येत।अतएवकुसुमांजलिप्रकाशेउत्पत्तिगर्भकादाचित्कत्वेसहेतुकत्वेलिंगंअतो ५३

नोत्पत्तौ व्यभिचार इति स्फुटमेवास्ति। न च स्वरूपद्वयमेव स्वरूपसंवंध इति कथं त
त्राप्यतिप्रसंगो वारणीय इति वाच्यं। घटे घटाभाव इति प्रत्ययवलेन प्रतियोगित्वलक्ष
णस्वरूपसंवंधविशेषवद् वधिमत्त्वस्याप्यनुभवसिद्धस्य दुरपह्नवत्वात्। अन्य
थैवंविधविकल्पेन वहुव्याकुलीभवेदिति। किंचैवं यदि विकल्प्येन तदाग्रिमलक्षणे
का गतिः नियमपूर्ववर्त्तित्वयोरन्याकथ्यग्रहत्वादित्यनुपदमेव स्फुटीभविष्यति। केचि
त्तु कार्याभावः कार्यनियतपूर्ववर्त्तित्वाभावः स तु शिलायां शिलात्वेनावच्छिद्यते वी
जेन्यासहकृतत्वेनेति अत एव कार्यनियतपूर्ववर्त्तिगर्भतया तावन्मात्रमेवान्वय
मुखलक्षणं लघिति व्यतिरेकमुखं हि अपि त्यक्त्वा तदेवशेषे सिद्धान्तयत्यनन्यथेती
ति वदंति। अनन्यथेति। अनन्यथासिद्धत्वे सति कार्यजातीयाव्यवहितपूर्वत्वव्या

पकाधिकरणताप्रतियोगित्वमित्यर्थः तेन यत्र घटपूर्वत्वं तत्र दंडाधिकरणत्वमिति
५४ व्यभिचारेपि यत्र घटाव्यवहितपूर्ववर्त्तित्वमित्यव्यभिचारात्सर्वं साध्विति भावः। अनए
वाव्यवहितपदं विशिष्यनोपात्तं नियतपदादेव तल्लाभादित्यवधेयं। नच वैयर्थ्यादेवत
दनुपादानं तथासति चिरध्वस्तेपि यागादौ स्वर्गैकसाधनत्वस्यानुपपत्त्यभावात् तदनु
पपत्त्याऽपूर्वेन कल्प्यतेति वक्ष्यमाणत्वात्। नच विरध्वस्तं कारणं व्यापारव्याप्तमिति वा २
मेस्तत्रापूर्वकल्पनेन नत्क्षयुक्तेरिति वाच्यं। तत्र व्यापाराभावप्रयोजकत्वशंकायामव्यवधा
नगर्भकारणतायाराववि पक्षवाधकत्वेनोक्तपर्यंतस्यावश्यकत्वात्। नचापूर्वकल्पने
पियागस्य स्वर्गाऽव्यवहितपूर्ववर्त्तिताऽरक्षणात्कथमुक्तयुक्त्याऽपूर्वकल्पनमिति
वाच्यं। स्वविरोधिक्षणानंतरितत्वस्याव्यवधानपदेन विवक्षिततयाऽपूर्वकल्पने ५४

यागानधिकरणकालस्यापिस्वर्गाव्यवहितत्वात्स्वजनकाधिकरणत्वस्वजनकान
धिकरणत्वाभ्यामेवक्षणस्यकार्यसिध्यनुकूलत्वाननुकूलत्वात्।यद्वायत्रघटाधिक
रणत्वंतत्रदंडाधिकरणक्षणोत्तरत्वमितिनियमः।उत्तरत्वस्यचपूर्वत्वनिरूप्यत्वा
त्पूर्वत्वस्यनियमः।एवंसत्यव्यहितपदमप्याधिकंप्रयोज्यंप्रागवन्नियतपदालाभा
त्।तत्प्रक्षेपप्रयोजनंतुक्रमेणपूर्वकल्पनादिरेवनचयत्रस्वर्गाधिकरणत्वंतत्रया
गाधिकरणत्वंतत्रयागाधिकरणाव्यवहितोत्तरत्वमित्यसंभवात्तदप्रक्षेपः।स्वांगमव्य
वधायकमितिन्यायेनतथानियमात्।अतएवतथानियमरक्षायैमपूर्वकल्पनेनान
चैवंध्वंसस्यापिस्वांगतयात्तेनापितथाभूतनियमनिर्वाहान्नापूर्वकल्पनेतिनतथा
भूतनियमनिर्वाहेपिविरोधात्तरेणतजुनकतायांयागस्यानन्यथासिद्धत्वाविरो

धेन च तत्परिहारादित्यपूर्वं वक्ष्यते। वस्तुतस्तु। नियमस्तत्समवधाननियमस्तत्स
५५ मवधानं तु तत्समवधानविरोध्यभावः। तद्विरोधी च स्वध्वस्तत्संसर्गाभावइति तत्वं
55 अतएव कुंभकारपितान्यथासिद्धत्वेन वारणीयः अन्यथा कुंभकारेण व्यवहिते
पूर्ववर्त्तित्वेनञ्चरणे तद्वारणायान्यथासिद्धिर्न्न स्वीक्रियेत। वस्तुतस्तु उभयत्र
नियमोपादानं यदा कार्याव्यवहितपूर्वक्षणस्तदा दंडो यदा घटस्तदा दंडाधिक
रणक्षणोत्तरक्षण इति ग्राह्यः कालिकव्याप्तेस्तथैव पर्यवसानात्। नियमश्चाव
श्यंभावस्तथा च कार्यपूर्वक्षणे यस्यावश्यंभाव इत्यर्थपर्यवसानमित्यन्ये। पूर्वव
र्त्तित्वं च प्रागभावावच्छिन्नसमयवृत्तित्वं प्रागभावश्च न विशेषणं येन प्रागभावेऽ
व्याप्तिः किंतु तदुपलक्षितकालवृत्तित्वं कालस्य स्थूलस्य हेतुत्वमधिकरणतायाः ५५

स्तत्रैव संभवात्। अधिकरणत्वेनैव जनकत्वात्तत्क्षणस्यापूर्ववृत्तित्वात्। तस्य च तत्ता
दृशक्षणवृत्तित्वमस्त्येव। प्रागभावो न प्रतियोगिजनकोऽभावः अन्योन्याश्रयत्वा
त्। नापि विनाश्यभावः। विनाशस्य प्रागभावगर्भतयाऽन्योन्याश्रयात्। उत्पत्तिगर्भतया
तन्निर्वचने चोत्पत्तेः स्वसमानकालीनपदार्थप्रतियोगिकध्वंसानाधारसमयसं
बंधरूपत्वेन्योन्याश्रयात्। नापि प्रतियोग्यन्यूनानतिरिक्तकालीनावधिकसामयि
कयावत्परत्वाश्रयसमानकालीनकादाचित्काभावत्तयात्तन्निर्वचनं प्रलयका
लीनपरमाणुक्रियाप्रागभावाव्याप्तेः किंतु गंधानाधारसमयानाधाराभावः। न च
तादृशसमयाप्रसिद्धः गंधत्वेस्वाधिकरणनधिकरणसमयवृत्तिकादाचित्क
मात्रवृत्तिजातित्वात्। चैत्रत्ववदित्यनुमानात्सिद्धिरिति। अत्र वदंति। भवतु यथा म

कथंचित्गंधानाधारसमयसिद्धिस्तदनधिकरणत्वंतुप्रागभावस्यकथंग्राह्यंनहि
५६ तत्रप्रत्यक्षमागमोवासंभवति।अनुमानंतुभवेत्तच्चप्रसिध्यनंतरंतथाचानुमान
प्रवृत्तौप्रागभावत्वेनधीःतस्यांचानुमानप्रवृत्तिरित्यन्योन्याश्रयात्।किंचोक्तंयदि
56 प्रागभावत्वंतदागंधानाधारःसमयोनास्तीत्यवधारितवतोमीमांसकादेर्घटो
भविष्यतीतिप्रतीत्यनुदयापत्तिः।विद्यमानप्रागभावप्रतियोगित्वस्यैवभविष्यत्व
त्वात्।अपिचयदुक्तंप्रागभावावच्छिन्नसमयसत्वेहेतुत्वंतत्राध्वंसस्याहेतुकत्वा
पत्तिस्तत्प्रागभावोहितत्प्रतियोगीतत्प्रागभावोवा।आद्येऽभावपदवैयर्थ्यंगंधाना
धारसमयानाधारमात्रस्यप्रागभावतयाव्यावर्त्याभावात्।अंत्येध्वंसजनकस्य
प्रागभावावच्छिन्नेऽभावादव्याप्तिः।नहिप्रतियोग्यपिस्वप्रागभावावच्छिन्नसमये। ५६

किंच गंधानाधारसमयगर्भवन्नीलानाधारसमयगर्भतयापि तन्निर्वचनात्त
ऊर्मेकारणत्वमिष्येत। तथा तथाविनिगमकाभावादुभयगर्भसाधनत्वन्नानुप्र
वर्त्तकत्तायां प्रवृत्त्यननुगमः। अपि च गंधानाधारसमयस्य महाप्रलयरूपत्वे
मानाभावः युगपन्नाशे मानाभावात्। तथा च यावद्गंधनाशानन्तरं वस्त्वंतरसत्व
संभावनं तया तत्प्रागभावस्य गंधानाधारसमयानात्वसंशये तत्कारणेपि तत्का
रणगर्भलक्षणाव्याप्तिसंदेहः एवं च व्यर्थविशेषणत्वसंदेहात्तद्वारकविशेषण
मप्यशक्यमिति। अत्र क्रमः॥ आकाशपदाच्छद्याश्रयत्वाद्युपलक्षिताकाशपदा
र्थेपि स्थितिवद्गंधानाधारत्वेन समयोपाधिविशेषस्यैवोपलक्षितस्य प्रतीतिः।
तथा च तत्समयविशेषानधिकरणभावत्वं प्रागभावत्वं इदमपि लक्षणमनुगम

कंनतुघटोभविष्यतीत्यादिप्रत्ययविषयोघमुपाधिःउक्तयुक्तेरननुभवाच्चाकिं
५७ तूत्तरसमयासनूघटाभावइदानीमित्येवघटोभविष्यतीतिप्रतीतिविषयः।न
57 चोत्तरत्वस्यध्वंसगर्भतयान्योन्याश्रयःउत्तरत्वस्यसमयविशेषस्यैवप्रत्यय
विषयत्वात्।तत्रोत्तरत्वधीश्चोत्तरकालिक्यनुगमायरावंवस्तुतोविनाशप्रभा
वविद्यमानत्वेवभविष्यत्त्वाविनाशित्वेनचतदज्ञानान्नान्योन्याश्रयः।किंतुवस्तु
तोविनाशस्यैवेदानींनास्तीत्येवज्ञानंएवंचाकाशपदात्कदाचिच्छब्दाश्रयत्वेनक
दाचित्स्पृष्टद्रव्यातिरिक्तद्रव्यत्वेनेतिवत्कदाचिन्नीलाद्यनाधारत्वेनापिसमयोप
लक्षणन्त्वकापिक्षतिः।तन्त्समयविशेषाव्रत्यभावावच्छिन्नसत्वस्यैवहेतुतयाच
नप्रवत्त्यननुगमः।नत्वाकाशपदान्नियतोपलक्षणोपस्थितिः।तथासतितस्य ५८

त[illegible]कत्वतापत्तेः।अत एव तत्समयानाधारत्वमपि सुग्रहं।पूर्वकालिकतत्सम
यसत्वे सतीदानीमसत्वेन गंधानाधारसमयानाधारत्वानुमानात्।नच दृष्टान्त
दुर्भिक्षं।गंधस्यैव तथाभावात्।एवं च तादृशसमयविशेषानाधारत्वप्रतियो
गिकाभावावच्छिन्नसमयवृत्तित्वं स्वहेतुत्वमिति निर्गलितं।अत एव तत्प्रतियोगि
काभाववत्वाभायाभावपदमपि दत्तं।अन्यथाव्यावर्त्याभावे तन्नोपादीयेत तदुपादा
ने च घटप्रागभावेन पटप्रागभावातिव्याप्तिः प्रसज्येत।यत्तु युगपन्नाशमानाभा
वेन गंधानाधारसमयस्य सर्वमुक्तित्वे मानाभाव इति तन्न।यावदंधनाशोऽदृ
ष्टाभावात्।अन्यथा संयोगविभागयोर्मिथो नाश्यतयाऽन्यतरावस्थितौ सर्वमुक्त्य
नुपपत्तेः।तथा च सर्वादृष्टाभावाद्यावत्कार्याभावो वाच्य इति युगपदेव तन्नाशः।

वस्तुतस्तुस्वरूपसंबंधविशेषःकारणताप्रतियोगित्वादिवत्तत्परिचायकएवायं
५८ धर्म्मविशेषउक्तइतिनकाप्यनुपपत्तिः।भवतूक्तरूपाकारणतासाचजन्मात्र
58 रसंस्कारादेवस्तनपानादिप्रवृत्तौस्मृतेतिविशिष्टस्यैवस्मरणान्नान्योन्यास
यइत्यपिवदंति।ननुकारणत्वादन्येनप्रकारेणसिध्यभावोनन्यथासिद्धिरि
न्यान्योन्याश्रयः।सिद्धिपदस्यचोत्पत्तिपरतायांनित्यमात्रेव्याप्तिः।ज्ञप्तिपरत्वे
ऽसंभवः।हेतोरपिप्रमेयत्वादिनाज्ञानादित्तियोगमपहायरूढमन्यथासिद्धि
पदार्थमाह।अन्यथेति।यद्यपिपंचधान्यथासिद्धिर्ग्रंथांतरेनिबद्धास्तिसंभ
वतिचतथावच्छेदकजनकजनकयोस्तिस्त्रभिरसंग्रहात्।नचयेनस
हैवेत्यनेनदंडरूपमिवदंडत्वमपिसंगृहीतमितिवाच्यं।तत्रहिसाहित्यप्रति ५८

योगिनादंडेनान्वयादिप्रतियोगिवद्रूपमन्यथासिद्धमित्यर्थः। प्रकृते च साहि
त्यप्रतियोगिदंडत्वमेवावच्छेदकं दंडेनान्यथासिद्धमिति महान्भेदः। तथाप्यवच्छे
दकजनकजनकयोः प्रकृतेतिसृभिरेव संग्रहान्न तत्संग्रहाय प्रकारद्वयं पृथ
गुक्तमिति भावः। येनेति। येन पृथगन्वयव्यतिरेकवता सहैव यस्य पूर्ववर्त्तित्वं
गृह्यते तेनान्वयादिमता तत्पूर्ववर्त्यन्यथासिद्धमित्यर्थः। पृथगन्वयादिविशे
षणपूरणान्नावच्छेदकदंडत्वादिना दंडान्यथासिद्धत्वमित्यर्थः। अत्राऽपृथग
न्वयादिमत इत्यपि यस्येति विशेषणं पूरणीयं तेन दंडेन दंडसंयोगस्य नान्य
थासिद्धिर्भवतीति ध्येयं। एतद्विशेषणद्वयमहिम्नैव यत्रोभयोरुभयविशे
षणावच्छेदेनान्वयाद्यनुविधानं तत्रैकेन नापरस्यान्यथासिद्धिः यथोद्भूतरू

पत्नेजसोः नचैवं तद्धिनिगमकाभावाद्दृढत्वदंडयोरुभयोरपिनैकेनापरस्या
५९ 59 न्यथासिद्धिः दृढत्वस्य च कर्म्मजिजनकत्वस्यान्वयाद्यननुविधानादिति दिक्
अन्यप्रतीतिः। नचैवमाकाशस्य संयोगं प्रत्यन्यथासिद्धिः शब्दं प्रति पूर्ववर्त्तित्वम
ऽज्ञात्वापि द्रव्यत्वेन पूर्ववर्त्तिताग्रहात्। नच द्रव्यत्वेनाकाशस्य ज्ञानहेतुतापातः
ग्रहकाभावे रूपूर्ववर्त्तिताऽग्रहात्। अन्यत्र प्रवेशाच्च। यत्तु यं प्रति पूर्ववर्त्तित्वे ग
हीते एव तत्पूर्ववर्त्तित्वानुपपादकं यस्य पूर्ववर्त्तित्वं गृह्यत इत्यवरूपं वाच्यं। अन्यथाऽपू
र्वैणस्वर्गेयागस्यान्यथासिद्धेः। तथा च शब्दपूर्ववर्त्तित्वग्रहेपि न संयोगान्यथासिद्धि
रिति तन्न। विभागद्वित्वादावप्येवमुक्तप्रकारानुसरणात्। अत एव दिक्कालावपि प
रत्वादिनानान्यथासिद्धौ कार्यमात्रे आधारत्वेन तत्पूर्ववर्त्तिताग्रहात्। वस्तुतस्त्व

न्यमित्यस्य यृमित्यर्थः। तेनयं प्रतिपूर्ववर्त्तित्वे गृहीत एवेत्यर्थः। न च परत्वादितथा।
अन्यतमपूर्ववर्त्तित्वग्रहेणापि नत्संभवेन तथा नियमाभावात्। अत एव कुंभकार
पितृपस्यामेवान्यथासिद्धौ प्रविशति चैत्रत्वादिनापि रूपेण कुंभकारजनकत्वं ज्ञा
त्वैव घटं प्रत्यन्वयादिग्रहात्। घटोत्पत्तौ तस्य साक्षादसमवधानेन कुंभकारद्वारैव
समवधाननियमाद्वैरूप्यमन्यपूर्ववर्त्तिताग्रहपूर्वकस्यैव घटपूर्ववृत्तित्वस्य ग्रहसं
भवात्। न हि पूर्ववर्त्तितामात्रं हेतुत्वं। वेमजातीयस्यापि घटपूर्ववर्त्तितया हेतुत्वापा
तात्। किंतु नियतपूर्ववर्त्तित्वं नियतपूर्वसमवधानरूपं। न च कुलालपितृत्वमज्ञा
त्वा कुलालपितुः समवधानघटोत्पत्तौ चास्य ग्रहात् तदानीं न हेतौ तस्य सत्वानियमा
त्। अत एव भ्रमिजनकदंडत्वेन हेतुत्वेपि न दंडो भ्रम्यान्यथासिद्धः। तद्देशावस्था

नेनरंडत्वेनापिपूर्ववर्त्तित्वग्रहसंभवान्नियमाभावात्। युगपदेव चक्रभ्रमिदंडयोः
६० पूर्ववर्त्तित्वग्रहइत्यनुपरमाकारएवस्फुटत्वादिति। अन्यत्रेति। पृथगन्वयाद्यन
नुविधायित्वे सति लघुनियतपूर्ववर्त्तिसमवधाननियतमित्यर्थः। तेन लाघवात्स्व
60 धर्मोपस्थितत्वाच्च लघुमहत्त्वादिनियतपूर्ववर्त्तितानद्व्याप्यानेकद्रव्यत्वस्यान्य
थासिद्धावन्यत्रेत्यभावादव्याप्तिः। पूर्ववर्त्तिन इति पंचम्या हेतुत्वप्रतिपादनात्
हेतुत्वग्रहेऽन्यथासिद्धिग्रहः तद्ग्रहे तदभावहेतुत्वग्रहात्यन्योन्याश्रयः। रासभस्या
प्येवमन्यथासिद्धत्वेऽनन्यथासिद्धपदादेव तद्वारणेन तु तद्वारणाय नियतपदोपा
दानं व्यर्थमित्यादीनि दूषणान्युलम्नकानि भवंति। अत एव दंडत्वादावपि न पृथग
न्यथासिद्धिः उक्तेनैव संग्रहात्। अत एवावच्छेदकीभूतोऽपि दंडसंयोगादौ दंडो नान्य ६०

थासिद्धाः। नन्वेवमिंद्रियसंयोगादावपींद्रियमन्यथासिद्धमितिचेत्। नालघुप
देन वारणात्। लाघवस्य वस्तुविवेचनया प्रथमोपस्थित्यभावादिंद्रियपूर्ववर्त्तिताग्र
हस्यप्राच्यत्वादितिदिक्। यत्तु प्रतियोगिजन्ये ध्वंसे सस्यान्यथासिद्धिस्तुरीयेति तन्न।
अपूर्वेणैव तदन्यथासिद्धेरुक्तत्वात्। नचैवैपरीत्यं विरोधस्योक्तत्वादपूर्वेवक्ष्य
माणत्वाच्च। ननु यागापूर्वयोर्युगपदन्वयानुविधानमस्ति अस्ति वान्यतरस्य लघू
पस्थितत्वमिति यागस्यान्यथासिद्धत्वं स्यादत आह यागेति। प्रथमोपस्थितत्वेन या
गस्यैव पूर्ववर्त्तित्वग्रहो ननु युगपत्। तदाह नत्त्ववगम्यमान इति न चापूर्वमेवान्य
थासिद्धमस्तु पृथगन्वयाद्यनुविधानादिति भावः। नन्वेवं कुलालेन कुलालस्य पिता
पिनान्यथासिद्धः स्यादित्यत आह यत्रेति। तत्र क्लृप्तपूर्ववर्त्ति नियततत यान्यस्य पूर्व

वर्त्तित्वग्रहनियतपूर्व्ववर्त्तित्वग्राहकतयाचोभयथान्यथासिद्धत्वमितिभावः।यत्रेति।
६१ तत्रद्वारीभूतस्यपृथगन्वयाद्यनुविधानेनोक्तापाअन्यस्यावाऽन्यथासिद्धेरभावादिति
भावः।न्वेवंचक्रभ्रमिजनकस्यापिकुलालपितृवदन्यथासिद्धत्वमतआहदंडेति।तत्र
61 द्वयोरपिसमवधानसम्भवेनस्वातंत्र्येणापिनियतपूर्व्ववर्त्तिताग्रहसंभवेनान्यंप्रतिपू
र्व्ववर्त्तिताग्रहएवेत्यवधारणासंभवादितिभावः।साधकाभावेनेति।ननुयत्रप्रमाणेल
घुगुरुविषयतासंभवस्तत्रैवलाघवंसहकारिनह्येकस्यलघुविषयतासंभवोन्यस्यगु
रुविषयकस्यप्रमितिजननेविरोधीगुरुमात्रस्यासिद्धिप्रसंगात्।विषयान्तरेमातान्तरे
णलाघवावतारस्यसुलभत्वादिति।मेवं।।यत्रैकसिद्धिरपरासिद्धिविरोधिनीतत्रैवला
घवावतारस्यगुरुसिद्धिप्रतिबंधकत्वात्।सवलाघवावतारोभिन्नयोरेकस्यचेत्यत्राऽ ६१

विशेषादिति संक्षेपः। असंगतिमवतारयति परमेति। वस्त्वर्थिप्रवृत्त्यादिकमप्यनुमानाद्भ
वतीति परमेत्युक्तं। आत्मेति। यद्यपि श्रुतिर्न साक्षादपवर्गहेतुतामाह तथापि दुःखेना
त्यंतं विमुक्तश्चरतीत्यर्थवादसमभिव्याहृताश्रुतिर्मोनत्वेनोक्तेति भावः। साक्षात्कर्त्तेव्यइ
त्याकारिकाश्रुतिरर्थपरतया निर्दिष्टा द्रष्टव्यः श्रोतव्यो मन्तव्यो निदिध्यासितव्य इत्येवमा
कारितायाः श्रुतेरदृष्टद्वारकताकल्पनगौरवमियोत्तरप्रतिपत्तिद्वारकलाघवादार्थ
क्रमेणाग्निहोत्रं जुहोति यवागूं पचतीतिवत् श्राद्धक्रमलेघनेनावत्स्यर्थे तात्पर्यपर्यवसा
नात् इति तथैव निर्दिष्टं न च तथैव श्रुतेराकार इति भ्रमः कर्त्तव्यः। समानेति। इदानीतन
दुःखध्वंसातिव्याप्तिवारणाय दुःखप्रागभावासहवृत्तित्वं ध्वंसविशेषणं। इदानीतन
स्यतत्समानकालीनत्वात्। तावन्मात्रे च कृते इदानीतनमुक्तावव्याप्तिः शुकादिध्वंसस्या

पिदुःखप्रागभावसमानकालीनत्वात्। अतो दुःखध्वंससमानाधिकरणत्वेनापि दुःख
६२ प्रागभावो विशेषितः। नचैवमप्युपां[illegible] दुःखध्वंसातिव्याप्तिः उपान्त्यदुःखध्वंसोऽस्य भो
गेन सच विशिष्टज्ञानात्माविशेषेण ज्ञानसापेक्षवृत्तिभोगकालएव दुःखनाशात् भो
62 गेन दुःखनाशेऽपि दुःखान्तरस्य विषयज्ञानादिसामग्रीविलंबेनोपान्त्यदुःखध्वंसानन्त
रमेव चरमदुःखोत्पत्तेः। वस्तुतस्तु दुःखप्रागभावासहवृत्तीति दुःखविशेषणं। नचै
वमव्याप्तिशंका। अंत्यदुःखप्रागभावकालीनत्वाद्दुर्यांत्यस्येति भावः। असौ दुःखध्वं
सः नतु प्रकृतः तस्यातीतत्वाद्यभावेन विकल्पासंभवादित्यवधेयं॥ ॥इतिश्रीम
होपाध्यायजयदेवमिश्रविरचितोनुमानखंडालोकः संपूर्णः॥